# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examinations, 2018

## SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (DRAMA & CHANDA)

## CORE-3 (CCSANH3)

Time Allotted: 2 Hours — Full Marks: 40

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit-I

1. कस्यापि एकस्य उत्तरं प्रदेयम् – 15×1 = 15

(क) अभिज्ञानशकुन्तलमाश्रित्य 'उपमाकालिदासस्य' इत्युक्तिः विवेचनीया।

(ख) अभिज्ञानशकुन्तले दुर्वाससः शापवृत्तान्तस्य तात्पर्यं प्रतिपाद्यताम्।

2. सरलसंस्कृतभाषया एकस्य व्याख्या कार्याः (देवनागरीलिप्यां लेखनीयम्) 6×1 = 6

(क) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारयाशमीलतां छेत्तुमृषिर्व्यवसति॥

(ख) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

(ग) भवन्ति नम्रास्तरवः फलागमै–
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्॥

3. मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः (एकस्य) 4×1 = 4

(क) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्यवपुश्च तस्याः॥

(ख) न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तुलराशाविवाग्निः।
क्व वत हरिणकाणां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रासाराः शरास्ते॥

4. अधस्थितेषु <u>पञ्चानाम्</u> उत्तरं सरलसंस्कृतेन देवनागरीलिप्यां प्रदेयम् – 1×5 = 5

(क) अभिज्ञानशकुन्तलम् इति नाटकस्य रचयिता कः ?

(ख) का आसीत् गौतमी ?

(ग) शकुन्तला कीदृशी नायिका ?

(घ) करभकः कः ?

(ङ) कुलपतिः किमर्थं सोमतीर्थं गतः ?

(च) अभिज्ञानशकुन्तले मुख्यः रसः कः ?

(छ) 'अर्थो हि कन्या परकीय एव' – कस्येयमुक्तिः ?

(ज) पङ्क्तिः पूरणीया – आपरितोषाद् विदुषां .........................।

.............................................. आत्मन्यप्रत्ययं चेतः॥

## Unit-II

5. अधःस्थितेषु <u>पञ्चानाम्</u> उत्तरं सरलसंस्कृतेन देवनागरीलिप्यां प्रदेयम् – 1×5 = 5

(क) छन्दोमञ्जरी केन प्रणीता ?

(ख) का नाम यतिः ?

(ग) सर्वलघु कस्मिन् गणे भवति ?

(घ) तगणे कः लघुः ?

(ङ) उपजातिछन्दसः लक्षणं लिखत ?

(च) पद्यं किम् ?

(छ) वसन्त तिलकस्य किं लक्षणम् ?

(ज) वृत्तस्य कति भेदाः ?

(झ) किं नाम समवृत्तम ?

6. अधोलिखितेषु छन्दःसु कस्यापि <u>एकस्य</u> संज्ञां प्रदाय सोदाहरणं देवनागरीलिपिमाश्रित्य संस्कृतभाषया आलोच्यताम्। 3×1 = 3

मन्दाक्रान्ता; इन्द्रवज्रा; तोटकम्; शिखरिणी।

7. अधोलिखितेषु <u>एकस्य</u> देवनागरीलिपिमाश्रित्य संस्कृतभाषया गणविश्लेषणपूर्वकं छन्दोनिर्णयं कृत्वा संज्ञा प्रदेया – 2×1 = 2

(क) न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्।

(ख) प्रवर्ततां प्रकृतिहिताय पार्थिवः।

(ग) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्।

——×——

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examinations, 2018

## SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (POETRY) & DRAMATURGY

## CORE-4 (CCSANH4)

Time Allotted: 2 Hours | Full Marks: 40

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit-I

1. संस्कृतभाषया एकस्योत्तरं प्रदेयम् (देवनागरी लिप्यां लेखनीयम्) –

(क) 'नारिकेलफलसम्मितं वचो भारवेः' इति वचनस्य याथार्थ्यं किरातार्जुनीयस्य प्रथमसर्गमवलम्ब्य प्रतिपादनीयम्। 10

(ख) किराते प्रथमसर्गे वर्णितं वनेचरवचनं तच्चरितञ्च आलोचनीयम्। 10

2. संस्कृतभाषया कस्याश्चिदेकस्य देवनागरीलिप्यांच व्याख्या कार्या – 5×1 = 5

(क) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान् निशिता इवेषवः॥

(ख) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हित मनोहरि च दुर्लभं वचः॥

3. संस्कृतभाषया देवनागरीलिप्या च अधस्थितेभ्य प्रश्नानां पञ्चानामुत्तरं कार्यम्। 1×5 = 5

(क) किरातार्जुनीये मङ्गलवाचकः शब्दः कोऽस्ति ?

(ख) 'न बाधतेऽस्य त्रिगणः परस्परम्' – केन कं प्रति इदमुक्तम् ? त्रिगणः इति शब्दस्य कोऽर्थः ?

(ग) वृकोदरः कः ? कथं तस्य एवमभिधानम् ?

(घ) वनेचरशब्दस्य व्युत्पत्तिः प्रदेया।

(ङ) 'किरातार्जुनीयम्' इति महाकाव्ये कति सर्गाः सन्ति ?

(च) 'कृतारिषड्वर्गजयेन' – इति श्लोकांशे अरिषड्वर्गपदस्य विवक्षितार्थः कः ?

(छ) 'किरातार्जुनीयम्' इति महाकाव्यस्य नायकः कः ?

अथवा

कस्यचिदेकस्य श्लोकस्य पादपूरणं विधेयम्। 5×1 = 5

(क) कृतारिषड्वर्गजयेन ..............................

.............................. नयेन पौरुषम्॥

(ख) श्रियः कुरुणामधिपस्य ..............................

.............................. वनेचरः॥

## Unit-II

4. कस्यचिदेकस्य प्रश्नस्योत्तरं कुरुत : 10×1 = 10

(क) प्रस्तावनालक्षणं तद्भेदाश्च सोदाहरणं प्रतिपाद्यताम्।

(ख) नान्दीलक्षणं तत्प्रकारभेदश्च सोदाहरणं साहित्यदर्पणानुसारं प्रतिपादनीयम्।

(ग) 'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्' – इत्यस्य याथार्थ्यं प्रतिपाद्यम्।

5. एकस्य प्रश्नस्योत्तरं कुरुत : 5×1 = 5

(क) कः व्यायोगः ? व्यायोगविषयकं विश्वनाथ-मतं प्रतिपादनीयम्।

(ख) का नाम अर्थप्रकृतिः ? तस्य कति भेदाः ? अर्थप्रकृतेः किमप्येकं भेदं सोदाहरणं प्रतिपादयत।

(ग) का नाम वृत्तिः ? वृत्तेर्भेदाः उल्लिख्य कोऽप्येकोः सोदाहरणमालोचनीयः।

6. सरलसुरगिरा पञ्चानां प्रश्नानामुत्तरं कार्यम् : 1×5 = 5

(क) विश्वनाथमते काव्यं कतिविधम् ?

(ख) का नाम वीथी ?

(ग) प्रहसनलक्षणं किम् ?

(घ) उपरूपकाणि कति ?

(ङ) सट्टके का भाषा व्यवह्रियते ?

(च) को नाम अङ्कावतारः ?

(छ) अभिनयः कतिविधः ?

अथवा

कस्यचिदेकस्य टिप्पणी कार्या – 5×1 = 5

विमर्षसन्धिः; प्रकरणम्; प्रवेशकः; पताका।

——×——